यो नोऽनुप्रविशेन्मोहात् स वै द्वादशवार्षिकम् ॥
वने चरेत् ब्रह्मचर्य्यमिति वः समयः कृतः ।
तदिदं द्रौपदीहेतोरन्योन्यस्य प्रवासनम् ॥
कृतवांस्तत्र धर्म्मार्थमत्र धर्म्मो न दुष्यति ।
परित्राणञ्च कर्त्तव्यमार्त्तानां पृथुलोचन ! ॥
कृत्वा मम परित्राणं तव धर्म्मो न लुप्यते ।
यदि वाप्यस्य धर्म्मस्य सूक्ष्मोऽपि स्यात् व्यतिक्रमः ॥
स च ते धर्म्म एव स्यात् दत्त्वा प्राणान् ममार्ज्जुन ! ।
भक्ताञ्च भज मां पार्थ ! सतामेतन्मतं प्रभो ! ॥
न करिष्यसि चेदेवं मृतां मामुपधारय ।
प्राणदानान्महाबाहो चर धर्म्ममनुत्तमम् ॥
शरणञ्च प्रपन्नास्मि त्वामद्य पुरुषोत्तम ! ।
दीनाननाथान् कौन्तेय ! परिरक्षसि नित्यशः ॥
साहं शरणमभ्येमि रोरवीमि च दुःखिता !
याचे त्वाञ्चाभिकामाहं तस्मात्कुरु मम प्रियम् ॥
स त्वमात्मप्रदानेन सकामां कर्त्तुमर्हसि ॥
वैशम्पायन उवाच ।
एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया ।
कृतवांस्तत्तथा सर्व्वं धर्म्ममुद्दिश्य कारणम् ॥
स नागभवने रात्रिं तामुषित्वा प्रतापवान् ।
उदितेऽभ्युत्थितः सूर्य्ये कौरव्यस्य निवेशनात् ॥
आगतस्तु पुनस्तत्र गङ्गाद्वारं तया सह ।
परित्यज्य गता साध्वी उलूपी निजमन्दिरम् ॥
दत्त्वा वरमजेयत्वं जले सर्व्वत्र भारत ! ।
साध्या जलचराः सर्व्वे भविष्यन्ति न संशयः” ॥*॥)

उल्का, स्त्री, (ओषतीति । उष दाहे “सुकवल्कोल्का” ३।४२। इति उणादिसूत्रेण क-प्रत्ययात् साधुः ।) तेजःपुञ्जः । इत्यमरटीकायां भरतः ॥ अग्निशिखा । अग्निः । इत्युणादिकोषः ॥ (यथा,
“तुलाराशिं गते भानौ अमावस्यां नराधिपः ।
स्नात्वा देवान् पितॄन् भक्त्या संपूज्याथ प्रणम्य च ॥
कृत्वा तु पार्व्वणश्राद्धं दधिक्षीरगुडादिभिः ।
ततोऽपराह्णसमये घोषयेन्नगरे नृपः ॥
लक्ष्मीः सपूज्यतां लोका उल्काभिश्चापि वेष्ट्यताम्” ।
इति तिथितत्त्वे अमावस्याप्रकरणे ।) आकाशात् पतिताग्निः । इति रायमुकुटादयः ॥
(“तञ्चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः” ।
इति मेघदूते पूर्व्वमेघे ५४ श्लोकः ।
“उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च”
इति मनुः । १ । ३८ ।) अस्या लक्षणम् ।
“दृहच्छिखा च सूक्ष्माग्रा रक्तनीलशिखोज्ज्वला ।
पौरुषीयप्रमाणेन उल्का नानाविधा स्मृता” ॥
इति काश्यपः ॥
(अस्याः कारणमाह गर्गसंहितायाम् ।
“अतिलोभादसत्याद्वा नास्तिक्याद्वाप्यधर्म्मतः ।
नरापचारात् नियतमुपसर्गः प्रवर्त्तते ॥
ततोऽपराधात् नियतमपवर्जन्ति देवताः ।
ताः सृजन्त्यद्भुतांस्तांस्तु दिव्यनाभसभूमिजान् ॥
त एव त्रिविधा लोके उत्पाता देवनिर्म्मिताः ।
विचरन्ति विनाशाय रूपैः संबोधयन्ति च” ॥
अस्या लक्षणादिकमुक्तं वृहत्संहितायां ३३ अध्याये । तद्यथा,—
“दिवि भुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः ।
धिष्ण्योल्काशनिविद्युत्तारा इति पञ्चधा भिन्नाः ॥ १ ॥
उल्का पक्षेण फलं तद्वद्धिष्ण्याशनिस्त्रिभिः पक्षैः ।
विद्युदहोभिः षड्भिस्तद्वत्तारा विपाचयति ॥ २ ॥
तारा फलपादकरी फलार्द्धदात्री प्रकीर्त्तिता धिष्ण्या ।
तिस्रः सम्पूर्णफला विद्युदथोल्काशनिश्चेति ॥ ३ ॥
अशनिः स्वनेन महता नृगजाश्वमृगाश्मवेश्मतरुपशुषु ।
निपतति विदारयति धरातलं चक्रसंस्थाना ॥ ४ ॥
विद्युत्सत्त्वत्रासं जनयन्ती तटतटस्वना सहसा ।
कुटिलविशाला निपतति जीवेन्धनराशिषु ज्वलिता ॥ ५ ॥
धिष्ण्या कृशाल्पपुच्छा धनूंषि दश दृश्यतेऽन्तराभ्यधिकं ।
ज्वलिताङ्गारनिकाशा द्वौ हस्तौ सा प्रमाणेन ॥ ६ ॥
तारा हस्तं दीर्घा शुक्ला ताम्राब्जतन्तुरूपा वा ।
तिर्य्यगधश्चोर्द्ध्वं वा याति वियत्युह्यमानेव ॥ ७ ॥
उल्का शिरसि विशाला निपतन्ती वर्द्धते प्रतनुपुच्छा ।
दीर्घा भवति च पुरुषं भेदा बहवो भवन्त्यस्याः ॥ ८ ॥
प्रेतप्रहरणखरकरभनक्रकपिदंष्ट्रिलाङ्गलमृगाभाः ।
गोधाहिधूमरूपाः पापा या चोभयशिरस्काः ॥ ९ ॥
ध्वजझषकरिगिरिकमलेन्दुतुरगसन्तप्तरजतहंसाभाः । श्रीवत्सवज्रशङ्खस्वस्तिकरूपाः शिवसुभिक्षाः
॥ १० ॥
अम्बरमध्याद्बह्व्यो निपतन्त्यो राजराष्ट्रनाशाय ।
सम्भ्रमति गगनोपरि विभ्रममाख्याति लोकस्य ॥ ११ ॥
संस्पृशती चन्द्रार्कौ तद्विसृता वा सभूप्रकम्पा च ।
परचक्रागमनृपवधदुर्भिक्षावृष्टिभयजननी ॥ १२ ॥
पौरेतरघ्नमुल्कापसव्यकरणं दिवाकरहिमांश्वोः ।
उल्का शुभदा पुरतो दिवाकरविनिःसृता यातुः ॥ १३ ॥
शुक्ला रक्ता पीता कृष्णा चोल्का द्विजादिवर्णघ्नी ।
क्रमशश्चैतान् हन्युर्मूर्द्धोरःपार्श्वपुच्छस्थाः ॥ १४ ॥
उत्तरदिगादिपतिता विप्रादीनामनिष्टदा रूक्षा ।
ऋज्वी स्निग्धा खण्डा नीचोपगता च तद्वृद्ध्यै ॥ १५ ॥
श्यामा वारुणनीलासृग्दहना सितभस्मनिभा रूक्षा ।
सन्ध्या दिनजा वक्रा दलिता च परागमभयाय ॥ १६ ॥
नक्षत्रग्रहघाते तद्भक्तीनां क्षयाय निर्दिष्टा ।
उदये घ्नती रवीन्दू पौरेतरमृत्यवेऽस्ते वा ॥ १७ ॥
भाग्यादित्यधनिष्ठामूलेषूल्काहतेषु युवतीनाम् ।
विप्रक्षत्रिपीड़ा पुष्यानिलविष्णुदैवेषु ॥ १८ ॥
ध्रुवसौम्येषु नृपाणां उग्रेषु सदारुणेषु चौराणां ।
क्षिप्रेषु कलाविदुषां पीड़ा साधारणे च हते ॥ १९ ॥
कुर्व्वन्त्येताः पतिता देवप्रतिमासु राजराष्ट्रभयम् ।
शक्रोपरि नृपतीनां गृहेषु तत्स्वामिनां पीड़ाम् ॥ २० ॥
आशाग्रहोपघाते तद्देश्यानां खले कृषिरतानाम् ।
चैत्यतरौ सम्पतिता सत्कृतपीड़ां करोत्युल्का ॥ २१ ॥
द्वारि पुरस्य पुरक्षयमथेन्द्रकीले जनक्षयोऽभिहितः ।
ब्रह्मायतने विप्रान् विनिहन्याद्गोमिनो गोष्ठे ॥ २२ ॥
क्ष्वेड़ास्फोटितवादितगीतोत्क्रुष्टस्वना भवन्ति यदा ।
उल्कानिपातसमये भयाय राष्ट्रस्य सनृपस्य ॥ २३ ॥
यस्याश्चिरं तिष्ठति खेऽनुषङ्गो दण्डाकृतिः सा नृपतेर्भयाय । या चोह्यते तन्तुधृतेव खस्था या वा महेन्द्रध्वजतुल्यरूपा ॥ २४ ॥
श्रेष्ठिनः प्रतीपगा तिर्य्यगा नृपाङ्गनाः ।
हन्त्यधोमुखी नृपान् ब्राह्मणानथोर्द्ध्वगा ॥ २५ ॥
बर्हिपुच्छरूपिणी लोकसंक्षयावहा ।
सर्पवत् प्रसर्पिणी योषितामनिष्टदा ॥ २६ ॥
हन्ति मण्डलापुरं छत्रवत्पुरोहितम् ।
वंशगुल्मवत् स्थिता राष्ट्रदोषकारिणी ॥ २७ ॥
व्यालसूकरोपमा विस्फुलिङ्गमालिनी ।
खण्डशोऽथ वा गता सस्वना च पापदा ॥ २८ ॥
सुरपतिचापप्रतिमा राज्यं नभसि विलीना जलदान् हन्ति । पवनविलोमा कुटिलं याता न भवति शस्ता विनिवृत्ता वा ॥ २९ ॥
अभिभवति यतः पुरं बलं वा भवति भयं तत एव पार्थिवस्य । निपतति च यया दिशा प्रदीप्ता जयति रिपूनचिरात् तया प्रयातः” ॥ ३० ॥)

उल्कामुखी, स्त्री, (उल्का अग्निशिखावत् तेजः मुखे यस्याः ।) जन्तुविशेषः । खेँकशियालि इति भाषा । तत्पर्य्यायः । शृगालिका २ लोमालिका ३ दीप्तजिह्वा ४ किखिः ५ । इति त्रिकाण्डशेषः ॥

उल्मुकं, स्त्री, (ओषतीति । उष दाहे + उल्मुकदर्वीति निपातनात् धातोः षस्य लः मुकप्रत्ययश्च ।) अङ्गारः । इत्यमरः ॥ (यथा, शतपथब्राह्मणे ६ । २ । ७ “अन्वाहार्य्यपचनादुल्मुकमादाय” । वृष्णिवंशीयराजा । यथा, महाभारते २ । निमन्त्रितराजागमने ३४ । १६ ।
“उल्मुको निशठश्चैव वीरश्चाङ्गावहस्तथा ।
वृष्णयो निखिलाश्चान्ये समाजग्मुर्महारथाः” ॥)

उल्लङ्घनं, स्त्री, (उत् + लघि + ल्युट् ।) अतिक्रमणम् । इति पुराणम् ॥ डिङ्गान इति भाषा । (यथा, कुमारे ३ सर्गे २५ श्लोकस्य टीकायां मल्लिनाथः । “समयोल्लङ्घनेन पराङ्गनासङ्गतिं प्रवृत्ते सति” ॥)

उल्ललः, त्रि, (उत् + लल् + अच् ।) बहुरोमयुक्तः । तत्पर्य्यायः । रोमशः २ । इति हारावली ॥

उल्ललितः, त्रि, (उत् + लल् + क्त ।) तरलितः । आन्दोलितः । इति जटाधरः ॥

उल्लसनकं, स्त्री, (उल्लसन + स्वार्थे कन् ।) रोमाञ्चः । इति हेमचन्द्रः ॥

उल्लाघः, त्रि, (उत् + लाघ् + गत्यर्थेति क्त । निपातनात् सिद्धम् ।) गदान्निर्गतः । नीरोगः । इत्यमरः ॥ शुचिः । दक्षः । हृष्टम् । मरीचमिति यावत् । इति विश्वमेदिन्यौ ॥ हृष्टमित्यत्र हृष्टमिति कस्याञ्चिन्मेदिन्यां पाठः ॥

उल्लापः, पुं, (उत् + लप् + घञ् ।) शोकरोगादिना ध्वनिविकारः । तत्पर्य्यायः । काकुवाक् २ । इति हेमचन्द्रः ॥ (यथाह, भर्त्तृहरिः । ३ । ६ ।
“खलोल्लापाः सोढ़ाः कथमपि तदाराधनपरैः ॥”)

उल्लासः, पुं, (उत् + लस् + घञ् ।) ग्रन्थपरिच्छेदः । इति भूरिप्रयोगः ॥ यथा काव्यप्रकाशे प्रथम-उल्लास इति प्रयोगः । वृद्धिः । इति श्रीभागवतम् ॥ आह्लादः । प्रकाशः ॥
(“निपतन्ति कन्दलदलोल्लासाः पयोबिन्दवः” ।
इति अमरुशतके । ४८ ।)

उल्लिखितः, त्रि, (उत् + लिख + क्त ।) उत्कीर्णः । तनूकृतः । इति मेदिनी ॥ चित्रितः । इति शब्द-